संस्कृतवार्ता:

06.04.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· भाजपेतिदलस्य वरिष्ठनेता प्रधानमन्त्री च नरेन्द्रमोदी सहारनपुरे नैर्वाचनिक-जनसभां सम्बोधितवान् ।

· राष्ट्र-विरोधितत्वानि विरुध्य कार्याचरणं कुर्वता जम्मू-कश्मीरस्य बारामूलायां आरक्षणदलेन सार्वजनिक-सुरक्षा-अधिनियमान्तर्गतं द्वयो: राष्ट्रविरोधिनो: निगडनं कृतम्।

· छत्तीसगढ़राज्ये सुरक्षाबलैस्साकं जाते एकस्मिन् संघर्षे त्रय: माओवादिन: मारिता:।

· राष्ट्रियान्वेषणाभिकरणेन पश्चिमबंगालस्य भूपतिनगरे घटिते विस्फोटप्रकरणे द्वौ मुख्य-षड्यन्त्रकारिणौ निगडितौ।

· आई.पी.एल् प्रतिस्पर्धायाम् अद्य जयपुरस्य सवाई-मानसिंह-क्रीडाङ्गणे राजस्थान-रॉयल्स-दलस्य प्रतिस्पर्धा रॉयल-चैलेंजर्स-बेंगलुरू-दलेन सह-भविष्यति।

<u>प्रधानमन्त्री-सहारनपुर</u>

प्रधानमन्त्री-नरेन्द्रमोदी प्रोक्तवान् यत् इदं निर्वाचनं केवलं सर्वकारस्य निर्माणार्थं नास्ति अपितु निर्वाचनमिदं विकसित-भारतस्य निर्माणार्थं वर्तते। विगतेषु पञ्चवर्षेषु भारतेन विश्वे पञ्चमार्थव्यवस्थात्वेन स्वीय-नामांकितम् श्रीमोदिना अद्य सहारनपुरे भाजपाया: प्रत्याशिन: राघव-लखनपालस्य एवं प्रदीप-चौधरी इत्येतस्य च समर्थने जनसभा सम्बोधयता एवं प्रख्यापितम्। अवसरेऽस्मिन् भाजपाया: वरिष्ठ नेता एवं मुख्यमन्त्री योगी-आदित्यनाथ: अपि उपस्थित: आसीत्। आकाशवाण्या: संवाददातानुसारं श्रीमोदिना कथितं यत् यदि उद्देश्या: समीचीना: चेत् परिणामा: अपि समीचीना: भवन्ति । तेनोदीरितं यत् भाजपा-सर्वकार: भेदभावेन विना कार्यं करोति। श्री मोदिना प्रोदीरितं यत् विगत-दशवर्षेषु सर्वकारेण कृषकाणां विकासार्थं सततं कार्यं विहितमस्ति। भाजपाया: वरिष्ठनेता योगी-आदित्यनाथेन कथितं यत् वयं भाग्यशालिन: स्म: यत: अस्माभि: नूतन-भारतवर्ष: दृष्ट: य: विश्वगुरुत्वेन ज्ञायते।

राजस्थान-प्रधानमन्त्री

प्रधानमन्त्री एवं वरिष्ठ भाजपा-नेता श्री नरेन्द्र मोदी राजस्थानस्य अजमेर-जनपदस्थ पुष्कर-स्थाने नैर्वाचनिक-जनसभां सम्बोधयति। इयं जनसभा अजमेर-पुष्करयो: भाजपा-प्रत्याशिनां समर्थने समायोज्यते। राज्ये लोकसभा-निर्वाचनार्थं श्रीमोदिन: इयं तृतीया जनसभा वर्तते। अपरत्र कांग्रेस-दलेन अद्य स्वीय-घोषणापत्रम्-आदाय जयपुरे जनसभा समायोज्यते। एतस्या: जनसभाया: सम्बोधनार्थं कांग्रेसस्य राष्ट्रियाध्यक्ष: मल्लिकार्जुन-खड्गे दलस्य वरिष्ठनेता सोनिया-गांधी एवं प्रियंका-गांधी इत्येते जयपुरे समागता: सन्ति। अस्यां जनसभायां सुखजिंदर-सिंह-रंधावा, अशोक-गहलोत, प्रमोद तिवारी, इत्येतान् समेत्य कांग्रेसस्य अन्ये वरिष्ठनेतार: अपि भागं भजमाना: सन्ति।

जम्मू-कश्मीर-बारामूला

राष्ट्र-विरोधितत्वानि विरुध्य कार्याचरणं कुर्वता जम्मू-कश्मीरस्य बारामूलायां आरक्षिदलेन सार्वजनिक-सुरक्षा-अधिनियमान्तर्गतं द्वयो: राष्ट्रविरोधिनो: निगडनं कृतम्। एतौ उधमपुरस्य जनपद-कारागारे प्रेषितौ। आरक्षिदलेन कथितं यत् एतौ विरुध्य पूर्वमपि बहूनि प्रकरणानि समिङ्कतानि सन्ति। एवं सत्यपि एताभ्यां स्वीय-राष्ट्र-विरोधी-एवं असामाजितक-गतिविधिषु परिष्कार: नैव कृत:।

छत्तीसगढ़-माओवादिन:

छत्तीसगढ़राज्ये सुरक्षाबलैस्साकं जाते एकस्मिन् संघर्षे त्रय: माओवादिन: मारिता:। इयं घटना बीजापुर-जनपदस्य उसुरक्षेत्रस्य अरण्ये घटिता। अयं क्षेत्र: तेलंगाना-सीम्न: निकटे वर्तते। संघर्षानन्तरं सुरक्षाबलेन त्रयाणां माओवादिनां मृत-शरीरेण सह ए.के. सप्तचत्वारिंशत् अल्प-यन्त्र-युता: भुशुण्डिका: सदृशानि शस्त्राणि अधिगतानि।

राष्ट्रियान्वेषणाभिकरणम्

राष्ट्रियान्वेषणाभिकरणेन द्वाविंशत्यधिक-द्विसहस्र-तमवर्षस्य-दिसम्बरमासे पश्चिमबंगालस्य भूपतिनगरे घटिते विस्फोटप्रकरणे द्वौ मुख्य-षड्यन्त्रकारिणौ निगडितौ। एतस्मिन् विस्फोटे त्रय: जना: मारिता:। अनेन अभिकरणेन अद्य एकस्मिन् वक्तव्ये कथितं एतौ आतङ्कवादिनौ राज्यस्य पूर्वीय-मेदिनीपुरजनपदे जनसर्म्मदात् क्षेत्रात् गृहीतौ। जातायां एतस्यां

जनसम्मर्द-घटनायां असामाजिक-तत्वानां प्रहारेण अस्य दलस्य एक: सदस्य: व्रणितो जात:। प्रशासिनक वाहनमपि क्षतियुतं जातम्।

अत्रान्तरे अनियन्त्रित-जनसम्मर्देन अन्वेषणाभिकरणस्य दलं अस्य च सुरक्षाकर्मिण: भूपति-नगर-आरक्षि-स्थानं प्रति गन्तुं निषेधिता:। गृहीतापराधिनो: अभिज्ञानं बलई-चरण-मैनी मनोब्रत-जना रूपेण जातम् उभौ आरोपिणौ आतंकस्य प्रसारे विस्फोनिर्माणकार्ये संलग्नौ स्त:।

भाजपा-स्थापनादिवस:

भारतीय-जनता-पार्टीति-दलस्य पञ्चचत्वारिंशत्तमे स्थापनादिवसे अस्य दलस्य वरिष्ठनेता प्रधानमन्त्री च नरेन्द्र मोदी दलस्य वरिष्ठनेत्रे अमितशाहाय, दलाध्यक्षाय जगत्प्रकाश-नड्डा इत्यस्मै कार्यकर्तृभ्यश्च शुभकामना: अपच्छत्। श्री मोदी एकस्मिन् सामाजिक सन्देशपटले दलकार्यकर्तृभ्य: वर्धापनानि प्रदत्तवान् अपि च वर्षेभ्य: दलनिर्माणे कार्यकर्तृणां कठिनपरिश्रमान् संघर्षान् योगदानानि च प्रति आभारम् अभिव्यक्तवान् । असौ अवदत् यत् दलस्य एन.डी.ए.-दले समावेशनं गौरवस्य वार्तास्ति। अत्रान्तरे श्री मोदी सहारनपुरक्षेत्रे स्वीयोद्बोधने कथितवान् यत् असंख्याजना: भाजपेतिदले समाविष्टा: यतो हि अनेन दलेन जनानां विश्वास: विजित:। अस्य कारणम् अन्यमपि अस्ति यत् अस्मै दलाय राष्ट्रं प्रथमम् अस्ति। एवञ्च अयं उद्घोष: नैव वर्तते अपितु अस्माकं विश्वासोविद्यते। स्थापनादिवसं अभिलक्ष्य श्री अमितशाहेनापि दलकार्यकर्तृभ्य: धन्यवादा: प्रकटिता:। श्री नड्डा अपि दलस्य राष्ट्रव्यापि-विस्ताराय वरिष्ठनेत्रृन् प्रति आभार अभिव्यक्तवान्।

सिसोदिया-निगडनम्

दिल्ली-न्यायालयेन मद्यनीति-प्रवञ्चनायां धनशोधन-प्रकरणे आम-आदमी-पार्टीति दलस्य नेता एवं दिल्ल्या: पूर्व-उपमुख्यमन्त्री-मनीष-सिसोदिया इत्येतस्य निगडनावधि: अप्रैलमासस्य अष्टादश-दिनांकं यावत् संवर्धिता। निगडनावधे: समाप्तौ राउज-एवेन्यू-न्यायालयस्य विशेष-न्यायाधीशेन कावेरी बावेजा इत्यनया तस्य निगडनावधि: समेधिता। प्रकरणेऽस्मिन् सहारोपी आप नेता संजय-सिंह: अपि कार्याचरणावधौ न्यायालये आसीत्। अस्मिन् प्रकरणे संजय-सिंह: साम्प्रतिके काले एव सर्वोच्च न्यायालयेन विमोचित:। राष्ट्रियान्वेषणाभिकरणे प्रवर्तन-निदेशालयेन च आम-आदमी-पार्टीति-दलस्य एते नेतार: मद्यनीति-प्रवञ्चनायां अनियमितताताम् उद्दिश्य आरोपिता: ।

ऋतुविज्ञानविभाग:

भारतर्तु-विज्ञान-विभागेन अद्य श्वश्च देशस्य पूर्वीय-उप-द्वीपीय-क्षेत्रेषु उष्णलर्ह्या: सम्भावना प्रकटिता। अद्य ओडिशा-पश्चिमबंगाल-झारखण्ड-महाराष्ट्र-कर्णाटक-आन्ध्रप्रदेश-पुद्दुचेरी-तेलंगाना-राज्यानां केषुचित् भागेषु उष्णलर्ह्या: प्रभाव: दरीदृश्यते। ऋतुविभागेन श्व: यावत् तटीयकर्णाटक-गोवा-राज्ययो: उष्णता भविष्यति। तत्रैव, केरल-तमिलनाडु-पुद्दुचेरी-राज्येषु अस्य मास्य नवमदिनांकं यावत् उष्णता आर्द्रता च भविष्यति।

आई.पी.एल. – क्रिकेट

आई.पी.एल् प्रतिस्पर्धायाम् अद्य जयपुरस्य सवाई-मानसिंह-क्रीडाङ्गणे राजस्थान-रॉयल्स-दलस्य प्रतिस्पर्धा रॉयल-चैलेंजर्स-बेंगलुरू-दलेन सह-भविष्यति। स्पर्धेयं सायं सार्धसप्तवादनात् समाप्स्यते। ह्य: प्रतिस्पर्धायां सनराइजर्स हैदराबादेन चैन्नई-सुपर-किंग्स दलं षड्स्तोभै: पराजितम्।

।। इति वार्ता :।।